## ॥ अथ पंचषष्ठितमोऽध्यायः ॥ chapter-65

मांधातोवाच :- एवं देवी जगन्माता ब्रह्मानन्दकारिणी ॥
लक्ष्मीः श्रीः कमलादेवी महालक्ष्मीरिति श्रुता ॥ १

तस्या देव्या व्रतं किं नु ममाचक्ष्व तपोधन ॥
व्रतेन येन चीर्णेन लक्ष्मीस्तुष्टा भवेन्नृणाम् ॥ २

वसिष्ठ उवाच :- अमर्षः पुरा राजन्नम्बरीषेण भूभुजा[1] ॥
पृष्टः प्रोवाच भगवान् देवदेवो जनार्दनः ॥ ३

श्रीभगवानुवाच:- महालक्ष्मीव्रतं राजन् शृणु श्रद्धासमन्वितः ॥
येन तुष्टा भवेद्देवी महालक्ष्मीर्मम प्रिया ॥ ४

तत्र[2] भाद्रपदे मासि शुक्लपक्षे नृपोत्तम ॥
दूर्वाष्टमीव्रतं कार्यमष्टम्यां वैष्णवं व्रतम् ॥ ५

कृष्णपक्षेथ राजेन्द्र श्रीव्रतं सिद्धिदं शुभं ॥
कार्यं षोडश वर्षाणि स्त्रिया वा पुरुषेण वा ॥ ६

स्नात्वा नद्यां तडागे वा[2ए] कृत्वा नियममात्मवान् ॥
निशीथे मंडलं कृत्वा शशिन्यभ्युदिते नृप ॥ ७

-०-

१ बी अम्बरीषेणभूभुजा नास्ति – व डी नास्ति, सी पुस्तकेत्र
पाठान्तरं तद् यथा

सूर्यवंशे पुरा राजन्नम्बरीषेण भूभुजा ॥

२ बी तस्मिन्

२ ए लक्ष्मीश्रीकमलादेवी

२ ए तडागे वा

३ ए कार्यंषोडश

श्रीवृक्षपत्रे विपुलैरन्ध्रे वा पद्मिनीदले ।।
पद्ममष्टदलं कार्यं श्वेतकिंजल्कभूषितम् ।। ८

प्रतिष्ठाप्य ततो देवीं विन्यसेत् कमलोपरि ।।
जया पूर्वदले शान्ता देवी वह्निदले तथा ।। ९

शीता याम्ये विशालाक्षी नैऋत्ये श्रीः च वारुणे ।।
वायव्यां कमलादेवी कौबेरे च कुमारिका ।। १०

ईशाने विष्णुनाम सर्वालंकारभूषिता ।।
पद्मगर्भे महालक्ष्मीरहं श्रीनन्दनस्तथा ।। ११

वामे विष्णुर्गदापाणिर्दक्षिणे कुसुमायुधः
एवं क्रमेण विन्यस्य पूजा कार्या प्रयत्नतः ।। १२

कर्पूरेणाथ शुभ्रेण चन्दनेन विशेषतः ।।
पुष्पैर्धूपैः सनैवेद्यैः कृत्वा पुष्पगृहं ततः ।। १३

तोरणं कदलीस्तम्भानुद्धृत्य श्रद्धयान्वितः ।।
ततः श्रीरस्त्विति मन्त्रेण पूजनीया सुरेश्वरी ।। १४

-०-

१ वी निवेशयेत्
२ वी श्री बर्वस्वेति
१ र श्री
२ र कर्पूरेणा
३ ए ईशाने

प्रदद्यात् श्रीफलैरर्घमष्टानामष्टभिर्नृप ।।
नालिकेरेण शुद्धेन महालक्ष्म्याः प्रदापयेत् ।। १५

निशीथेऽपि तत्कार्यं स्वसख्यैः पायसभोजनम् ।।
रात्रौ जागरणं कार्यं गीतवादित्रनिस्वनैः ।। १६

प्रातः स्नात्वाथ शुचिमान् पूजां कृत्वा नरेश्वर ।।
लक्ष्मीनारायणाभ्यां वै परिधानं तु कारयेत् ।। १७

व्रतमेतत् करिष्यामि यावद्वर्षाणि षोडश ।।
अस्तु संनिहितास्माकं श्रीर्देवहरिणासह ।। १८

इत्युच्चार्य निरो भक्त्या भोजनान्ते क्षमापयेत् ।।
लक्ष्मीनारायणौ देवस्तथा च कुसुमायुधः ।। १९

प्रसीदेयुर्महाराज सिद्धिाः स्युर्न संशयः ।।
अथ षोडश वर्षान्ते लक्ष्मीनारायणौ नृप ।। २०

-०-०-

१ बी-पायसभोजनैः
२ थी ई-वीणान्तरात्
१ ए-फलैर्घ
२ ए-न्यलि
३ ए-सिद्धिा

पलहेममथ: कार्यस्तंदद्यार्धेन[1] वा पुन:
अभ्यर्च्य विधिवम्दत्त्वा विप्राय प्रतिपादयेत् ॥ २१

कृतं षोडशवर्षाणि व्रतमेतन्मया प्रभो ॥
प्रसीदतं यमैतेन लक्ष्मी नारायणौ सदा ॥ २२

पूर्वस्मिन्नष्टमीरात्रावर्धश्यामतनुर्हरि: ॥
अर्धचन्द्रोज्ज्वला लक्ष्मीर्नात्र कार्या विचारणा ॥ २३

एवं पुरा महालक्ष्मीव्रतं सिद्धिप्रदं नृणाम् ॥
देव: कथितवान् विष्णुरम्बरीषस्य भूपतें: ॥ २४

एतल्लक्ष्मीव्रतं पुण्यंच य: करोति यथाविधि ॥
विलयं यान्ति तस्याशु[1] पापान्युग्रकृतान्यपि ॥ २५

व्रतस्यास्य प्रभावेण रन्तिदेवो नृपोत्तम: ॥
विमुक्त: पशुघातोत्थात्पापादिति श्रुतं हि नौ[2] ॥ २६

-०-

१ घ ई पलहेममथोकार्यो
२ बी अनेक पशुघातोत्थात् पापात् मुक्तो हिन: श्रुतम् ॥
१ ए तस्मामुपापा

इदं य: शृणुयात् मर्त्यो वाच्यमानं शुभं व्रतम् ।।
न कदाचित्तस्य दारिद्र्यं गृहे भवति पार्थिव ।। २७

इति श्री स्कन्दपुराणे एकाशिति साहस्त्र्यां संहितायां तृतीय परिच्छेदे ब्राह्मविभागे श्रीमाल माहात्म्ये महालक्ष्मी व्रतन्नाम पंचषष्ठितमोऽध्याय: ।।

-०-